✧˖°*❋ ❋*°˖✧

# बृहस्पति स्तोत्र
# (Brihaspati Stotra)

✧˖°*❋ ❋*°˖✧

# बृहस्पति स्तोत्रं

*मन्त्रमहार्णवे बृहस्पतिस्तोत्र*

ॐ ग्रां ग्रीं ग्रौं सः गुरुवे नमः।

ॐ बृं बृहस्पतये नमः।

ध्यान मंत्र

रत्नाष्टापद वस्त्र राशिममलं दक्षात्किरनतं करादासीनं,
विपणौकरं निदधतं रत्नदिराशौ परम्।
पीतालेपन पुष्प वस्त्र मखिलालंकारं सम्भूषितम्,
विद्यासागर पारगं सुरगुरुं वन्दे सुवर्णप्रभम्।।
गुरु का वैदिक मंत्र

ओम बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्।।
बृहस्पति विनियोगा मंत्र

ॐ अस्य बृहस्पति नमः

ॐ अनुष्टुप छन्दसे नमः

ॐ सुराचार्यो देवतायै नमः

ॐ बृं बीजाय नमः

ॐ शक्तये नमः

ॐ विनियोगाय नमः

ऊं अंशगिरसाय विद्महे दिव्यदेहाय धीमहि तन्नो जीवः प्रचोदयात्।

## बृहस्पति स्तोत्र

पीताम्बरः पीतवपुः किरीटी, चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दण्डं च कमण्डलुं च, तथाक्षसूत्रं वरदोऽस्तु मह्यम ।।1।।

नमः सुरेन्द्रवन्द्याय देवाचार्याय ते नमः ।
नमस्त्वनन्तसामर्थ्यं देवासिद्धान्तपारग ।।2।।

सदानन्द नमस्तेस्तु नमः पीडाहराय च ।
नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ।।3।।
नमोऽद्वितीयरूपाय लम्बकूर्चाय ते नमः ।
नमः प्रहृष्टनेत्राय विप्राणां पतये नमः ।।4।।

नमो भार्गवशिष्याय विपन्नहितकारकः ।
नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ।।5।।

विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम ।
प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदम ।।6।।

इति मन्त्रमहार्णवे बृहस्पति स्तोत्रम

≪ • ◦ ❈ ◦ • ≫

# Brihaspati Stotra

Om grāṁ grīṁ grauṁ saḥ guruve namaḥ।
Om bṛiṁ bṛihaspataye namaḥ।

**Dhyāna Mantra**

ratnāṣṭāpada vastra rāśimamalaṁ dakṣātkirantam karādāsīnaṁ,
vipaṇaukaraṁ nidadhataṁ ratnadirāśau param।
pītālepana puṣpa vastra makhilālaṁkāraṁ sambhūṣitam,
vidyāsāgara pāragaṁ suraguruṁ vande suvarṇaprabham।।
Guru Kā Vaidika Mantra

Om bṛihaspataye ati yadaryo arhād dyumadvibhāti kratumajjaneṣu yaddīdayachchavasa ṛitaprajāta tadasmāsu draviṇaṁ dhehi citram।।
Bṛihaspati Viniyogā Mantra

Om asya bṛihaspati namaḥ:
Om anuṣṭup chhandase namaḥ:
Om surācāryo devatāyai namaḥ:
Om bṛiṁ bījāya namaḥ:
Om śaktaye namaḥ:
Om viniyogāya nama:
Oṁ aṁśagirasāya vidmahe divyadehāya dhīmahi tanno jīva: pracodayāt।
Bṛihaspati Stotra

**pītāmbaraḥ pītavapuḥ kirīṭī, chaturbhujo devaguruḥ praśāntaḥ।
dadhati daṇḍaṁ ca kamaṇḍaluṁ ca, tathākṣasūtraṁ varado'stu mahyam।।1।।

Namaḥ surendravandyāya devācāryāya te namaḥ।
Namastvanantasāmarthyam devāsiddhāntapāraga॥2॥

Sadānanda namastestu namaḥ pīḍāharāya ca।
Namo vācaspate tubhyaṁ namaste pītavāsase॥3॥
Namo'sdvitīyarūpāya lambakūrcāya te namaḥ।
Namaḥ prahṛṣṭanetrāya viprāṇāṁ pataye namaḥ॥4॥

Namaḥ bhārgavashiṣyāya vipannahitakārakaḥ।
Namaste surasainyāya vipannatrāṇahetave॥5॥

Viṣamasthastathā nṛṇāṁ sarvakasṭapraṇāśanam।
Pratyahaṁ tu paṭhedyo vai tasya kāmaphalapradam॥6॥

Iti mantramahaṛṇave bṛihaspati stotra.

✧ₓ┉┉°*❋ ❋*°┉┉ₓ✧

# बृहस्पति स्तोत्रं

## स्कन्द पुराणे बृहस्पति स्तोत्रं

अस्य श्री बृहस्पतिस्तोत्रस्य गृत्समद ऋषि:,
अनुष्टुप् छन्द:,बृहस्पतिर्देवता,
बृहस्पति प्रीत्यर्थं जपे विनियोग:।

ध्यानम्:

गुरुर्बृहस्पतिर्जीव: सुराचार्यो विदां वरः।
वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा।।1।

सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः।
दयाकरः सौम्यमूर्तिः सुरार्च्यः कुड्मलद्युतिः।।2।।

लोकपूज्यो लोकगुरुः नीतिज्ञो नीतिकारकः।
तारापतिश्चाङ्गिरसो वेदवेद्यः पितामहः।।3।।

भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत्।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नरः।।4।।

जीवेत् वर्षशतं मर्त्यः पापं नश्यति नश्यति।
यः पूजयेत् गुरुदिने पीतगन्धाक्षताम्बरैः।।5।।

पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम्।
ब्रह्मणान् भोजयित्वा च पीडाशान्तिर्भवेत् गुरोः।।6।।

।।इति श्री स्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम्।।

# Brihaspati Stotra

Asya śrī bṛihaspatistotrasya gṛtsamad ṛṣiḥ,
anuṣṭup chandaḥ, bṛihaspatirdevatā,
bṛihaspati prītyartham jape viniyogaḥ।

**Dhyānam:**

gururbṛihaspatirjīvaḥ surācāryo vidāṁ varaḥ।
vāgīśo dhiṣaṇo dīrghaśmaśruḥ pītāmbaro yuvā।।1।।

sudhādṛṣṭirgrahādhīśo grahapīḍāpahārakaḥ।
dayākaraḥ saumyamūrtiḥ surārcyaḥ kuḍmaladyutiḥ।।2।।

lokapūjyo lokaguruḥ nītijño nītikārakaḥ।
tārāpatiścāṅgiraso vedavedyaḥ pitāmahaḥ।।3।।

bhaktyā bṛihaspatiṁ smṛtvā nāmānyetāni yaḥ paṭhet।
arogī balavān śrīmān putravān sa bhavennaraḥ।।4।।

jīvet varṣaśataṁ martyaḥ pāpaṁ naśyati naśyati।
yaḥ pūjayet gurudine pītagandhākṣatāmbaraiḥ।।5।।

puṣpadīpopahāraiśca pūjayitvā bṛihaspatim।
brahmaṇān bhojayitvā ca pīḍāśāntirbhavet guroḥ।।6।।

**।।Iti śrī skandapurāṇe bṛihaspatistotraṁ sampūrṇam।।**